# अर्थवत् प्रमाणम्

**भवानीप्रसाद मिश्रः (विद्यावारिध्यनुसन्धाता)**
उपप्राध्यापकः, न्यायविभागः
नेसंवि, जनताविद्यापीठम्, दाङ, नेपाल
bpshreeniwas@gmail.com
https://doi.org/10.3126/haimaprabha.v25i01.96675

***सारसङ्क्षेप***
*दृश्यते ज्ञायतेऽनेन वस्तुतत्त्वम् इति व्युत्पत्त्या यथार्थज्ञानस्य साधनपरत्वेन दर्शनशब्दः प्रयुक्तो दृश्यते । पदार्थनिश्चयार्थं दार्शनिकैः सिद्धान्तानुसारेण स्वमतपोषणाय परमतदूषणाय च प्रमाणसङ्ख्या, स्वरूपादि च स्वीक्रियते । प्रमाणं सप्रयोजनं सार्थकं च भवति । यद्वस्तु प्रमीयते, अथ वा प्रमाता यद्वस्तुसम्बद्धं ज्ञानं प्राप्नोति, यद्वा प्रमाणविषयीभूतं वस्तु, तदेव प्रमाणस्य अर्थो भवति, यथा - सुखदुःखादिः । आलेखेऽस्मिन् प्रमाणं कथम् अर्थवद् भवतीति समस्याम् उद्भाव्य तस्य प्रमाणवत्तासाधानरूपं समाधानम् एव उद्देश्यत्वेन निर्धारितं वर्तते । न्यायदर्शनस्य प्रमाणशास्त्रत्वात् अत्रानुसन्धाने केवलं न्यायदर्शनदिशा एव प्रमाणस्य अर्थवत्त्वं साधितं वर्तते । ग्रन्थाश्रिते गुणात्मके सोद्देश्येऽनुसन्धानेऽस्मिन् प्रमाणस्यार्थवत्त्वसाधानाय न्यायदर्शनस्य प्रमाणसम्बद्धा मूलग्रन्था व्याख्यादिग्रन्थाश्च क्रमशः प्राथमिकसामग्रीरूपेण द्वितीयकसामग्रीरूपेण च सङ्कलिताः सन्ति । तासां सामग्रीणां वर्णनं विधाय निष्कर्षितो वर्तते । ज्ञानसाधनरूपं प्रमाणं वर्तते । एतच्च प्रमाणं न्यायदर्शने प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्चेति चतुर्विधं वर्तते । प्रमाणं सम्प्लवेन व्यवस्थया वा अर्थसम्बद्धं ज्ञानं जनयति । न्यायदर्शने चक्षुरादीन्द्रियाणां रूपरसादय एव अर्थपदेन वाच्या, परं चक्षुरादीन्द्रियाणां रूपरसाद्यर्थेन सह सन्निकर्षे जाते उत्पन्नं सुखदुःखादि एव अत्र मुख्यरूपेण अर्थपदवाच्यम्, प्राणिभिः साक्षाद् अनुभूयमानत्वात् । तेन ज्ञानेन यदि प्रमाता इष्टरूपे प्रवृत्तौ समर्थो भवति, प्रतिकूलाच्च निवृत्तौ वा समर्थो भवति, तदा प्रमाणस्य अर्थवत्त्वं सिद्ध्यति । तस्य च इन्द्रियार्थसन्निकर्षो यदि प्रमाणम्, तदा ज्ञानं फलम्, यदा च ज्ञानम् एव प्रमाणम्, तदा हानोपादानोपेक्षाबुद्धिरेव फलम् भवति । एवं प्रकारेण अत्र प्रमाणस्य अर्थवत्त्वं साधयित्वा निष्कर्षो विहितो वर्तत इति ।*
**शब्दकुञ्जी** : आस्तिकदर्शनम्, तत्त्वज्ञानम्, दुःखम्, न्यायः, सुखहेतुः ।

## विषयपरिचय

दृश्यते ज्ञायतेऽनेनेति दर्शनम् इति व्युत्पत्यनुसारि-दर्शनशब्द ज्ञानसाधनपरः । दृष्टिरेव दर्शनमिति व्युत्पत्या ज्ञानमेव दर्शनमिति बुद्ध्यते । अनेन ज्ञानसाधनं ज्ञानमेव वा दर्शनशब्दार्थः सिद्ध्यति । ज्ञानं च तद्वति तत्प्रकारकत्वम्, यथार्थज्ञानमिति यावत् । 'दृशिर् प्रेक्षणे' धातोः भावे करणे च ल्युट्-प्रत्यये, अनादेशे 'दर्शनम्'-इतिशब्दो निष्पद्यते । व्युत्पत्याऽन्ययापि दर्शनशब्दस्य निष्पत्तिर्भवितुमर्हति । किन्त्वत्र विविधार्थेषु प्रयुज्यमानस्य दर्शनशब्दस्यास्य मुख्यरूपेण दृश्यते ज्ञायतेऽनेन इति करणार्थक-व्युत्पत्तिरेव समीचीना प्रतिभाति ।

मुण्डे मुण्डे मतिर्भिन्ना, रुचीनां वैचित्र्यात्, इत्यादिवचनवल्लोकस्य विचित्रा रुचिर्दृश्यते। अत एव च दर्शनानां भेदो जात इति सर्वैरनुभूतो विषयः । तेन च प्राच्यप्रतीच्यभेदेन दर्शनमपि द्विधा विभक्तं दृश्यते । प्राच्यदर्शनेष्वपि आस्तिकनास्तिकभेदेन विभागद्वयमस्ति। अस्ति नास्ति दिष्टं मतिः (पाणिनिः, ४/४/६०) इति पाणिनीयसूत्रानुसारेण - अस्ति परलोक इति मतिर्यस्य स आस्तिकः, नास्ति परलोक इति मतिर्यस्य स नास्तिकः, इतिव्युत्पत्या पूर्वजन्मपुनर्जन्मस्वर्गापवर्गादिविषयेषु यस्य श्रद्धास्ति, स आस्तिकः, यस्य नास्ति स च नास्तिकः, इति ज्ञायते। परन्तु दर्शनक्षेत्रे आस्तिकनास्तिकशब्दौ भिन्नरूपेण निरूपितौ, अर्थादत्र यानि दर्शनानि वेदाख्यं शास्त्रं प्रमाणत्वेन स्वीकुर्वन्ति तान्यास्तिकानि, यानि च वेदप्रामाण्यमस्वीकुर्वन्ति दर्शनानि, तानि नास्तिकदर्शनान्युच्यन्ते। यथोक्तं मनुना – 'नास्तिको वेदनिन्दकः' (मनुः, ख्रैष्टाब्दम् २००१) इति । इदमेव च दर्शनानामास्तिकनास्तिकभेदस्य प्रयोजकम् । वेदानुकूलानि दर्शनानि चास्तिकानि, वेदाननुकूलानि च नास्तिकानीति फलितार्थः।

प्रमीयतेऽनेन वस्तुतत्त्वमिति प्रमाणमिति प्रमाणस्य लक्षणम्। अनेन वस्तुनो वास्तविकस्वरूपज्ञानस्य साधत्वेन प्रमाणं ज्ञायते । 'प्र'उपसर्गपूर्वकात् मा-धातो करणार्थे ल्युट्-प्रत्यये 'प्रमाणशब्दो निष्पद्यते । 'यस्येप्साजिहासप्रयुक्तस्य प्रवृत्तिः स प्रमाता, स येनार्थं प्रमिणोति तत्प्रमाणम्' (वात्स्यायनः, न्याभाष्यम्- १/१/१, सं. २६९, पृ. ३) इत्याह वात्स्यायनः । अर्थनिश्चयकरणे साधनं प्रमाणमित्यर्थः। प्रत्यक्षात्मिकप्रमायाः साधनम् चक्षुरादि प्रमाणम्, अनुमितप्रमायाः साधनं लिङ्गदर्शनं प्रमाणम्, उपमितौ च साधनं सादृश्यज्ञानं प्रमाणम्, शाब्दबोधे च साधनं शब्दः प्रमाणम् । 'प्रमायाः करणं प्रमाणमिति प्रमाणसामान्यलक्षणम्' (भट्टः, तर्कसङ्ग्रहः- दीपिकाव्याख्या, ई.सं. २००३, पृ. ६७) इति चाह अन्नम्भट्टमहोदयः। ज्ञानप्राप्तौ अतिशयितं कारणं प्रमाणम् इत्याशयः।

एतच्च प्रमाणम् अर्थवद् भवति । अर्थवत्त्वं नाम अर्थेन सह सम्बन्धः, अर्थप्रकाशनसामर्थ्यं वा, यस्य कश्चिद् विषयोऽस्ति, तस्य विषयस्य बोधने सामर्थ्यम् अस्ति, निरर्थकं नास्ति, अतः अर्थवद् वर्तते। सप्रयोजनमस्तीति ताप्यर्यम् । एतदेव प्रमाणस्य अर्थवत्त्वम् इति । प्रमाणस्यास्य कथम् अर्थवत्ता साधिता न्यायदर्शन इति जिज्ञासा एवात्र समस्यारूपेणोपस्थापिता वर्तते। एतज्जिज्ञासाया समाधाने योऽपि प्रयत्नो विहितः, या युक्तिरूपस्थापिता, यच्च तर्कप्रमाणादिकं प्रस्तुतम्, तदत्र प्रस्तुत्य प्रमाणस्य अर्थवत्वसाधनम् एवास्य शोधलेखस्य उद्देश्यं वर्तते। अनुसन्धानमिदं न्यायदर्शनम् एवाश्रित्य सम्पादितं वर्तते। प्रासङ्गिकरूपेणान्यतोऽपि विषयाः समाविष्टा भवन्ति, परन्तु मूलं क्षेत्रं तु न्यायदर्शनमेव। न्यायदर्शने च प्रमाणं तस्य अर्थवत्ता च शीर्षकीकृता वर्तते।

न्यायसूत्रकारेण प्रथमसूत्रे प्राधान्येन प्राथम्येन च 'प्रमाण'पदं पठितम्, तदनु एव प्रमेयादिपदार्थाः स्मृता इति स्पष्टमेव। एतत् संसूचयति यत् - प्रमाणस्य महत्ता सर्वातिशायिनी वर्तते। एतदेवास्य अर्थवत्त्वं साधयति। न्यायभाष्यकारेण च भाष्यारम्भे कण्ठत एवोक्तः प्रमाणस्य अर्थवत्त्वविषयः। तत्र तेन विषयान्तरैश्च सह साधितं प्रमाणस्यार्थवत्त्वम्। तत्रैव तेन वहबो विषयाश्च प्रतिपादिताः। तथापि साक्षात् प्रमाणस्यार्थवत्ता-विषयमधिकृत्य तदनन्तरकाले न केनापि शोधितम्। तदनुसन्धानस्याभावाद् इदानीं प्रमाणस्य अर्थवत्ता-प्रतिपादनाय प्रयत्नोऽयं विहितो वर्तते।

## अध्ययनविधिः

प्रस्तुताध्ययनं पौरस्त्यानुसन्धानपरम्परामनुसृत्य विहितं दार्शनिकसाहित्याश्रितं गुणात्मकमनुसन्धानं वर्तते । अनुसन्धानेऽस्मिन् लोकव्यवहार-शास्त्रीयव्यवहारादिदृष्ट्या न्यायदर्शनानुसारि-प्रमाणानाम् अर्थवत्त्वं प्रतिपादितं वर्तते । आलेखस्यास्य निर्माणक्रमेऽवलम्बितो विधिरत्र प्रस्तूयते :

**अनुसन्धानप्रकारः** प्रस्तुतमिदम् अनुसन्धानं वाङ्मयाश्रितं गुणात्मकस्वरूपकं वर्तते । न्यायदर्शनस्य ग्रन्थेषु प्रमाणविषयकसामग्रीम् अन्वीष्य तद्विश्लेषणं च विधाय प्रमाणस्यार्थवत्वं निष्कर्षरूपेणोपस्थापने प्रयत्नो विहितो वर्तते ।

**आदर्शचयनम्** अध्ययनमिदम् उद्देश्यमूलकं वर्तते, अतो न्यायदर्शनस्य विविधेषु विषयेषु मध्ये प्रमाणेन सह सम्बद्धः प्रमाणस्य प्रयोजनसाधकः - 'अर्थवत् प्रमाणम्' इतिविषयः स्वीकृतो वर्तते ।

**तथ्यसङ्कलनम्** अत्रानुसन्धाने न्यायदर्शनस्य प्रमाणसम्बद्धान् ग्रन्थान् प्रसङ्गानुसारेण अन्यदर्शनस्य च ग्रन्थान् चावलोकयित्वा तथ्यं सङ्कलितं वर्तते ।

**तथ्यसङ्कलनोपायः** अनुसन्धास्यास्य ग्रन्थाश्रितत्वात् न्यायदर्शनस्य प्रमाणसम्बद्धा मूलग्रन्थाः, तद्व्याख्यादिग्रन्थाश्च सामग्रीरूपेण सङ्कलिता वर्तन्ते । तत्रापि न्यायदर्शनस्य मूलग्रन्थाः प्राथमिकतथ्यरूपेण व्याख्यादिग्रन्थाश्च द्वितीयकसामग्रीत्वेन स्वीकृताः सन्ति । एतदर्थं पुस्तकालयस्योपयोगो विहितो वर्तते ।

**विश्लेषणविधिः** अध्ययनेऽस्मिन् वर्णनात्मकविधिम् अनुश्रित्य सङ्कलितस्य तथ्यस्य विश्लेषणं विहितं वर्तते । वर्णनक्रमे यथावश्यकस्थलेषु उदाहरणं च प्रदाय निष्कर्षणे प्रयत्नः साधितो विद्यते ।

## सैद्धान्तिकाधारः

प्रस्तुताऽऽलेखनिर्माणकार्ये गौतममुनिप्रणीतो न्यायदर्शनस्य सिद्धान्त एव सैद्धान्तिकाधारत्वेनाङ्गीकृतो वर्तते । अनेन मुनिना न्यायशास्त्रे षोडश पदार्था उक्ताः । एतेषां पदार्थानां यथार्थरूपेण ज्ञानात् अपवर्गाप्तिर्भवतीति सिद्धान्तितम् । न्यायसूत्रं यथा - प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः (गौतमः, न्या.सू. १/१/१) इति । अत्र प्रमाणपदार्थः प्राधान्येन चर्चितो विद्यते । अतः शास्त्रमिदं प्रमाणशास्त्रत्वेन प्रसिद्धिं भजते । प्रमाणानि चत्वार्युक्तानि दर्शनेऽस्मिन् । यथा- प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि (गौतमः, न्या.सू. १/१/३) इति । प्रत्यक्षप्रमाणम्, अनुमानप्रमाणम्, उपमानप्रमाणम्, शब्दप्रमाणं चेति चत्वारि प्रमाणानीत्यर्थः । एवं प्रमेयं द्वादश सङ्ख्याकमुक्तम् । सूत्रं यथा - आत्माशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् (गौतमः, न्या.सू. १/१/९) इति । अत्र प्रमाणप्रमेय एव मुख्यौ पदार्थौ, प्रमाणेन प्रमेयनिश्चयीकरणे सहायकत्वेन पदार्थाश्चान्येऽपि परिगृहीता वर्तन्ते । एवमुक्तो न्ययदर्शनगतः सिद्धान्त एव शोधलेखस्यास्य सैद्धान्तिकाधारत्वेनाङ्गीकृतो वर्तते ।

## विषयविश्लेषणम्

न्यायदर्शनस्य प्रमाणशास्त्रत्वं प्रसिद्धं दर्शनक्षेत्रे । इदमेव शास्त्रं तर्कशास्त्रम्, तर्कविद्या, आन्वीक्षिकी, इत्याद्यभिधानैश्चाभिधीयते । दर्शनानि चान्यानि वैशेषिक-वेदान्तादीनि प्रमेयशास्त्राणि सन्ति, तैश्च न तावता प्रामुख्येन प्रमाणं व्याख्यातम्, लक्ष्यानुसारिणी एव चर्चा प्राप्यते । परन्तु प्रमेयतत्त्वज्ञानस्य प्रमाणाधीनत्वात्, तत्त्वज्ञानस्य च निःश्रेयसहेतुत्वात् प्रमाणस्य श्रेष्ठत्वं प्रदर्शितं न्यायदर्शने । एतेषां प्रमाणानाम् अर्थवत्त्वसाधनप्रकारोऽत्र प्रदर्श्यते ।

**प्रमाणम्** प्रमीयतेऽनेनेति प्रमाणमिति व्युत्पत्त्या प्रमाणशब्दस्तत्त्वज्ञानसाधनपरः । येन वस्तुतत्त्वं ज्ञायते तत् प्रमाणम्, येन वा प्रमेयसिद्धिर्भवति तत् प्रमाणमिति । सर्वैरपि दर्शनैः स्वसिद्धान्तं प्रतिपादयितुं प्रयोजनानुसारं भिन्न-भिन्न-सङ्ख्याकानि प्रमाणानि स्वीकृतानि । सर्वेषां प्रमाणसङ्ख्या-विषयिकी मान्यता श्लोकेनैकेनाध उल्लिखितेन प्रस्तूयते -

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ
भासर्वज्ञश्च साङ्ख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति ।
प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः
षट्कं पौराणकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात् ॥ (मानमेयोदयः, प्रमाणानि-६) इति ।

चार्वाकाः प्रत्यक्षमेकमेव प्रमाणं स्वीकुर्वन्ति, बौद्धा वैशेषिकाश्च प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयमङ्गीकुर्वन्ति । नैयायिकेष्वन्यतमो भासर्वज्ञः साङ्ख्याश्च प्रत्यक्षमनुमानं शब्दश्चेति प्रमाणत्रयमाश्रयन्ति, नैयायिकाः प्रत्यक्षमनुमानमुपमानं शब्दश्चेति प्रमाणचतुष्केण निर्वहन्ति, प्रभाकरानुयायिनो मीमांसका अर्थापत्तिसहितं प्रमाणपञ्चकं मन्यन्ते, भाट्टमीमांसका वेदान्तिनश्च सानुपलब्धिं प्रमाणषट्कमनुमन्यन्ते, एवं पौराणिकाश्च सम्भव-ऐतिह्ययुतं प्रमाणाष्टकम् अङ्गीकृत्य व्यवहारं सम्पादयन्ति । अत्र - उदयानाद्याश्चतुष्कं वदन्ति इत्यनेन नैयायिका उक्ताः, तेषां प्रमाणसङ्ख्या च सङ्केतितेति ज्ञायते । अर्थात् न्यायदर्शनानुसारेण चत्वारि प्रमाणानि स्वीक्रियन्ते । तानि च प्रत्यक्षानुमानोपमानशब्दाख्यानि । उक्तं च न्यायदर्शनकारेण- प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि (न्यायसूत्रम् - १/१/४) इति । प्रत्यक्षज्ञानस्य करणं तु चक्षुरादीनि इन्द्रियाण्येव । तच्च सविकल्पकनिर्विकल्पकभेदेन द्विविधम् । नामजात्यादिविशेषणरहितं ज्ञानं निर्विकल्पकप्रत्यक्षम्, सविशेषं प्रत्यक्षज्ञानं सविकल्पकप्रत्यक्षम् । अनुमितिकरणम् अनुमानम्, व्याप्तिस्मरणं लिङ्गदर्शनं चानुमितौ करणम् । अनुमितिज्ञानं च स्वार्थपरार्थभेदेन द्विविधम् । उपमितिकरणम् उपमानम् । अत्रोपमानं सादृश्यज्ञानम् । आप्तवाक्यं शब्दप्रमाणम् । दर्शनेतरैः स्वीकृतानि अर्थापत्यादीनि प्रमाणानि न्यायदर्शने एतेषु चतुर्ष्वेवान्तर्भाव्यन्ते ।

अर्थः

अर्थ्यते = समीह्यत इत्यर्थः, पदार्थ इति यावत् । न्यायदर्शने पृथिवी-जल-तेज-वाय्वाकाशानां विशेषगुणाः गन्धरसरूपस्पर्शशब्दा एव अर्थत्वेन वर्णिता विद्यन्ते । ते च सूत्रे सूत्रिता यथा - गन्धरसरूपस्पर्शब्दाः पृथिव्यादिगुणास्तदर्थाः (गौतमः, न्या.सू. १/१/१४) । अत्र 'पृथिव्यादिगुणाः' इति पदे समासबहुत्वं दृश्यते । एवं समासबहुत्वं प्रदर्श्य कस्मिन् समासे तत्त्वमिति संदिह्यति न्यायवार्तिककारः । स चाह - पृथिव्यादीनां गुणा इति षष्ठीसमासः । पृथिव्यादीनि च गुणाश्चेति द्वन्द्वः । पृथिव्यादयो गुणा एषामिति बहुव्रीहिः । एवमनेकसमासोपपत्तेः संशयः । किमत्र तत्त्वमिति ? द्वन्द्वः समास इति तत्त्वम् (उद्योतकरः, न्यायवार्तिकम्, २०६४, पृ. ७१) इति । अत्र षष्ठि-बहुव्रीहिसमासयोरश्वारस्यं प्रदर्श्य द्वन्द्वसमासं स्वीकरोति सः । एवं द्वन्द्वसमासे स्वीकृते पृथिव्यादीनि भूतानि तद्विशेषगुणाः रूपादय गृह्यन्ते । चक्षुरादीन्द्रियाणां नियतरूपेण निर्धारिता विषया गन्धरसासदयः, त एव च पृथिव्यादीनां पञ्चभूतानां विशेषगुणाः, अर्थपदवाच्या वर्तन्त इत्यर्थः । परन्तु भारद्वाजस्तु 'पृथिव्यादि'इत्यनेन पृथिव्यप्तेजांसि गुणेषु च सङ्ख्यादयोऽपि गृह्णाति । यथाह - पृथिव्यादिग्रहणेन पृथिव्यप्तेजांसि बाह्यकरणग्राह्याण्यपदिश्यन्ते, गुणग्रहणेन च सर्व आश्रितो गुण इति सङ्ख्यपरिमाणपृथक्त्व-संयोगविभागपरत्वापरत्वस्नेहवेगकर्मसामान्यविशेषा अनाश्रितश्च समवायस्तद्धर्मत्वाद्गुण इति (उद्योतकरः, न्यायवार्तिकम्, २०६४, पृ. ७२) इति । तर्कभाषाकारस्तु षडर्थान् प्रस्तौति । यथा - अर्थाः षट् पदार्थाः । ते च

द्रव्यगुणकर्मसामान्यविशेषसमवायाः (केशवमिश्रः, ई.सं. २०१७, पृ. ३०४) इति । अत्र मिश्रमहोदयेन वैशेषिकोक्ता द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायश्चेति षट् पदार्था एव पदार्थत्वेनोक्ताः । संसारे येऽपि पदार्था लभ्यन्ते, ते सर्वेऽपि एतेषु मध्य एव भवन्ति, एतदितरं न किमपि प्राप्यते । 'प्रमाणम् अर्थवत्' इत्यत्र प्रयुक्तोऽर्थशब्दस्तु प्रयोजनार्थपरः । प्रमाणानां प्रयोजनम् एतेषां पदार्थानां तत्त्वज्ञानम् एवेत्युक्ते न कापि विप्रतिपत्तिः । प्रमाणानां प्रवृत्तिः सप्रयोजना भवति । शास्त्र उक्तं वर्तते यत् - प्रयोजनमनुद्दीश्य न मन्दोऽपि प्रवर्तत इति । अर्थान्मन्दबुद्धिश्च प्रयोजनं विना न चेष्टते । येन प्रयुक्तः प्रवर्तते, तत् प्रयोजनम् । यमर्थमभीप्सन् जिहासन् वा कर्मारभते (वात्स्यायनः, न्या.भा. १/१/१, सं. २०६९, पृ. ८) । येन प्रेरितः सन् इष्टेषु कार्येषु प्रवर्तते, अनिष्टाच्च निवर्तते, तत् प्रयोजनमित्यर्थः । अर्थः, प्रयोजनम्, विषयबोधः, प्रमाजनक इत्यादिशब्दाः प्रमाणस्यास्यार्थवत्त्वसम्बन्धे पर्यायत्वेन प्रयुक्ता दृश्यन्ते । अतोऽर्थवत्त्वं नाम प्रयोजनवत्त्वं प्रमाजनकत्त्वं विषयबोधकत्त्वम् इत्याद्यवगन्तव्यम् ।

अर्थानां सङ्ख्या

निरवच्छिन्नेऽनादिमति परोक्षापरोक्षप्रवाहेऽस्मिन् प्रमाणम्, प्रमेयम्, प्रमितिः, प्रमाता चेति चतसृषु विधासु तत्त्वं परिसमाप्यते । तत्र - यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता, स येनार्थं प्रमृणोति तत्प्रमाणम्, योऽर्थः प्रमीयते तत् प्रमेयम्, यत् अर्थविज्ञानं सा प्रमितिः, चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते (वात्स्यायनः, न्यायभाष्यम्, २०६९, पृ. ३) इत्यब्रवीन्न्यायभाष्यकारो वात्स्यायनः । प्रमाणादीनां परिचयोऽत्र प्रस्तुतो विद्यते । एतेषु प्रमाणस्यैव प्राधान्यम् - 'मानाधीना मेयसिद्धि'रित्युक्तत्वात् । प्रमेयस्य सिद्धिः किं वा तत्त्वज्ञानं प्रमाणाधीनं वर्तते । एतेन ज्येष्ठेन श्रेष्ठेन च सर्वातिशायिना प्रमाणेन प्रमातव्यः कोऽयमर्थपदवाच्यः ? कतिविधश्च सः ? इतिजिज्ञासा स्वाभाविकी एव । अत्रोच्यते - अर्थस्तु सुखं सुखहेतुश्च, दुःखं दुःखहेतुश्च (वात्स्यायनः, न्यायभाष्यम्, २०६९, पृ. ३) इति । तर्कभाषाकारेण वैशेषिकदर्शनसम्बद्धा द्रव्यादयः षट् पदार्थाः पदार्थरूपेण प्रस्तुता वर्तन्ते, न्यायसूत्रकारेण च स्वयमेव सूत्रे चक्षुरादीन्द्रियाणां रूपरसादयो विषया अर्थत्वेन अर्थिताः सन्तीति पूर्वम् उक्तमेव, परन्तु न्यायसूत्रस्य व्याख्यात्रा भाष्यकारेण महर्षिवात्स्यायनेन 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यात् अर्थवत् प्रमाणम्' इति भाष्यारम्भवाक्यस्य व्याख्यानक्रमे सुखादीनि अर्थरूपेण प्रस्तुतानि सन्ति । अत्र प्रश्नो जागर्ति यत् - वात्स्यायनः सूत्रकारस्य महर्षिगौतमस्य मतं विरुद्ध्यते ? इति । प्रथमदृष्टिपाते विरोध इव प्रतिभाति, परन्तु वस्तुतस्तत्र विरोधो नास्ति । अत्र इत्थं समाधीयेत - प्रथमन्तु चक्षुरादीन्द्रियाणां विषयाः रूपरसादय एव अर्थपदेन गृह्यन्ते । इन्द्रियाणाम् अर्थैस्सह सन्निकर्षानन्तरं रूपसरादीनि ज्ञानानि उत्पद्यन्ते । तत्र इष्टेभ्यः सुखानुभूतिर्द्विष्टेभ्यश्च दुःखानुभूतिर्जायते । एतदेव च प्राणिभिः साक्षात् अनुभूयमानं वस्तु, अनेनैव हानोपादानोपेक्षाबुद्धिरुत्पद्यते, अत एव न्यायभाष्यकारेण सुखदुःखादीनि एव अर्थपदेन प्रारम्भ एव सम्बोधितानि, अतोऽत्र नास्ति विरोध इति । अत्र सङ्क्षेपेण सुखादीनां चर्चां कुर्मः ।

**सुखं तद्धेतुश्च**

जीवात्मनां सकलानामिष्टः, अनुकूलतयानुभूयमान आत्मधर्मविशेषः सुखमस्ति । सुदर्शनाचार्य आह - स च कश्चित् सुखरूपो यथाऽनुकूलपदार्थसम्बन्धजन्य आत्मधर्मविशेषो हर्षापरपर्यायः प्राणिमात्रप्रसिद्धः (वात्स्यायनः, न्यायभाष्यम्, २०४३, पृ. २) इति । अनुकूलविषय इन्द्रियसंयोगादुत्पन्नो हर्षाभिध आत्मनो गुणविशेष एव सुखमित्यर्थः । सर्वेषामनुकूलतया वेदनीयं सुखम् इत्याह तर्कसङ्ग्रहकारः (अन्नम्भट्टः, ई.सं. २००३, पृ.१६०) । इदं च सुखमनुभूतिविषयः । अनुभूतेरस्या एकत्वेऽपि तामनेकशब्दैः सम्बोधयन्ति दर्शनकाराः । यथा - योगदर्शने योगः = चित्तवृत्तिनिरोध एव सुखम्, साङ्ख्यदर्शने सत्त्वगुणाधिक्यं

सुखम्, एवंप्रकारेणान्येष्वपि दर्शनेषु विविधरूपेणोक्तम् । सुखं चेदं लोकानम् इष्टं वर्तते, तच्च धर्मजन्यं भवति । आह पञ्चाननभट्टाचार्यः - सुखं तु जगतामेव काम्यं धर्मेण जन्यते (न्यायसिद्धान्तमुक्तावली, २०६३, कारिका - १४५) इति । अत्र सुखस्य धर्मजन्यत्वम् उक्तम् । स च धर्मः स्वर्गादिसकलानां सुखानां साधनं भवति । सोऽयं धर्मः कस्माज्जन्य इत्युक्ते उच्यते - विहितकर्मजन्यो धर्मः (भट्टः, ई.सं. २००३, पृ. १६२) इति । अर्थाद्वेदादिशास्त्रैः कर्तव्यत्वेन निर्दिष्टकर्मणा उत्पन्नो धर्म इत्यर्थः । तर्हि किंस्वरूपः स चेत्यत्रोक्तम् - धर्माधर्मावदृष्टं स्याद् धर्मः स्वर्गादिसाधनम् । गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः (भट्टाचार्यः, न्या.सि.मु., कारिका - १६१/१६२) इति । स च धर्मो मनसा वाचा कर्मणा च सम्पादितो भवति । यथा - शरीरेण दानं यजनं परिचरणादिकम्, मनसा दया श्रद्धादि, वाचा सत्यभाषणं प्रियवचनं स्वाध्यायादिकम् । एतादृशैः कर्मभिरुत्पन्नम् अदृष्टं स्वर्गादिसुखानां कारणं भवतीति । इदं च सुखं प्रत्येकम् आत्मनि विशेषत्वेन अनुभूयमानत्वात्, आत्मानां चानन्त्यात् अनन्तम् उक्तम्, एवं प्रकारेण तद्धेतुश्च ।

दुःखं तद्धेतुश्च

न्यायसूत्रे प्रमेयेष्वन्यतमत्वेन स्मृतं वर्तते दुःखम् । सूत्रं यथा -बाधनालक्षणं दुःखम् (गौतमः, न्या.सू. - १/१/२१) इति । वात्स्यायनो वक्ति- तत्पुनः प्रतीकूलवेदनीयं बाधना पीडा ताप इति (न्यायभाष्यम्, २०६९, पृ. २०) । सकलप्राणिनाम् अनिष्टत्वेन अनुभूयमानं दुःखं बाधना पीडा ताप इत्यदिशब्दैश्च सम्बोध्यते । साङ्ख्यदर्शनानुसारेण दुःखं बुद्धितत्त्वस्य परिणामविशेषः, तच्च रजकार्यम् इति । तत्रोक्तं वर्तते - तदेतत् प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातम् (मिश्रः, साङ्ख्यतत्त्वकौमुदी, ई.सं. २०१२, पृ. ९) इति । दुःखं चैतत् साङ्ख्यनये त्रिविधम् उक्तम् - आध्यात्मिकाधिदैविकाधिभौतिकभेदेन । ईश्वरकृष्ण आह -

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात् ॥ (साङ्ख्यकारिका - १) ।

दुःखत्रयेणाऽभिघाताल्लोकैरेतच्छास्त्रनिर्दिष्टे दुःखत्रयात्यन्तविच्छेदे प्रकृतिपुरुषविवेकख्यात्यात्मके ज्ञानरूपे हेतौ जिज्ञासा कर्तव्या इत्यर्थः । गौडपादाचार्य आह - तत्राध्यात्मिकं द्विविधम् - शारीरं मानसं चेति । शारीरं वातपित्तश्लेष्मविपर्ययकृतं ज्वरातिसारादि । मानसं प्रियवियोगाऽप्रियसंयोगादि। आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं मनुष्यपशुमृगपक्षिसरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्रहस्थावरेभ्यो, जरायुजाऽण्डजस्वेदजोद्भिज्जेभ्यः सकाशादुपजायते । आधिदैविकं देवानामिदं दैवम्, दिवः प्रभवति वा दैवम्, तदधिकृत्य यदुपजायते शीतोष्णवातवर्षाऽशनिपातादिकम् (ईश्वरकृष्णः, साङ्ख्यकारिका- गौडपादभाष्ययुता, ई.सं. २०२३, पृ. २-३) इति ।

सर्वैरपि प्रतिकूलतयाऽनुभूयमानं दुःखमिदं न्यायनये इतरद्वेषानधीनद्वेषविषयलक्षणकम् । भीमाचार्येणोच्यते - तच्च दुःखमेकविंशतिभेदभिन्नम् । तथाहि शरीरम्, षडिन्द्रियाणि, षड्विषयाः, षड्विधानि प्रत्यक्षाणि, सुखम्, दुःखं चेति । शरीरं दुःखायतनत्वाद्दुःखम् । इन्द्रियाणि विषयाः प्रत्यक्षाणि च सत्साधनत्वात् । सुखं दुःखानुसङ्गात् । दुःखं तु स्वरूपत एवेति (भीमाचार्यः, न्यायकोषः, ई.सं. २०२१, पृ. ३५७) इति । एतच्च दुःखं साक्षात् परम्परया वा सर्वैरपि प्राणिभिः प्रतिक्षणम् अनुभूतो विषय इति ।

सकललोकेषु व्याप्तम्, अखिलप्राणिसमुदायम् आकुलीव्याकुलीकरणसमर्थं तदिदं दुःखं कथम् उत्पद्यते ? किंहेतुकं तदिति जिज्ञासायाम् योगदर्शनेन अविद्यादयः पञ्चक्लेशा एव तत्कारणत्वेन उच्यन्ते । ते च यथा - अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः (पतञ्जलिः, योगसूत्रम्- २/३) इति । एतान् एव क्लेशान् आश्रित्य जीवः पुनर्जन्म लभते, अर्थात् एते जीवस्य पुनर्जन्मनः कारणानि भवन्ति । एतदेव च महद्दुःखं खलु । अतः क्लेशा एते दुःखस्य कारणत्वेन वर्तन्ते । साङ्ख्यशास्त्रानुसारेण प्रकृति-पुरुषयोर्विवेकज्ञानाभाव एव दुःखस्य कारणम् । तच्च पञ्चविंशतितत्त्वाज्ञानात् जायते । ज्ञानार्थं च सत्त्वगुणोद्रेकस्य कारणत्वं 'सत्त्वं लघु प्रकाशकम्' इत्युक्तत्वात् । विवेकज्ञानम् एव प्रतिकोटिभूतं सर्वं संस्कारादिकं विनाश्य मोक्षार्थं सामर्थ्यं सम्पादयति । गीताचार्येण अपि उक्तम् - ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा (गीता - ४/३७) इति ।

न्यायशास्त्रे विपर्यय-विपरीतज्ञानापरपर्यायं मिथ्याज्ञानं दुःखस्य हेतुत्वेन उक्तम् । एतज्ज्ञानस्यात्यन्तिकनिवृत्तिरेव न्यायदर्शने मोक्ष इत्युक्तमस्ति । सूत्रकार आह - दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः (गौतमः, न्या.सू. १/१/२) इति । अनात्मनि आत्मेत्यादिमिथ्याज्ञानात् रागद्वेषाधिकारात् इर्ष्यामायालोभादयो दोषा जायन्ते । दोषैरेतैरवशतया प्रवर्तितो जन आशरीरपातं शुभाशुभकार्येषु प्रवर्तते, तानि एव कार्याणि तस्य निन्दितस्य अभिनन्दितस्य वा जन्मनः कारणानि भवन्ति । अस्मात् दुःखम् उत्पद्यते । एवं पूर्वपूर्वक्रमेण जन्मादीनि दुःखस्य कारणानि भवन्ति । एतेषां दुःखकारणानां नाशे सत्येव अपवर्गप्राप्तिर्भवतीति सूत्रस्याशयः । क्रमस्तु यथा वात्स्यायनः - यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति, तदा मिथ्याज्ञानापाये दोषा अपयान्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्यपाये जन्मापैति, जन्मापाये दुःखमपैति, दुःखापाये च आत्यन्तिकोऽपवर्गो निःश्रेयसमिति (न्या.भा., २०४३, पृ. १५-१६) इति ।

**प्रमाणस्य अर्थवत्त्वम्**

अर्थवत्त्वं नाम प्रयोजनवत्त्वं फलवत्त्वं वेति । प्रमाणस्य अर्थवत्त्वं नाम प्रमाणं सप्रयोजनं वर्तते, फलवत् वर्तत इति । फलवत्त्वं च प्रमाणेन निश्चितेऽर्थे प्रमातुर्निर्बाधतया प्रवृत्तिसाफल्येन सिद्ध्यति । प्रमाणस्य अर्थवत्ताविषये किंवा प्रमाणस्य प्रामाण्यविषये वात्स्यायनेन न्यायभाष्यस्य प्रारम्भ एव अनुमानप्रमाणात् परतःप्रामाण्यं साधितम् । वाक्यं यथा - प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् (न्यायभाष्यम्, २०४३, पृ. १) इति । अत्र प्रमाणम् पक्षः, अर्थवत्त्वं साध्यम्, प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यात् इति हेतुः । प्रमीयते = ज्ञायते = निश्चीयतेऽनेन वस्तुतत्त्वम्, प्राप्यतेऽभीप्सितार्थम् अनेनेति प्रमाणम्, प्रत्यक्षादिचतुष्टयम्, तस्मात् = तेन, अर्थप्रतिपत्तौ = घटपटादिपदार्थविषयकज्ञाने जाते, प्रवृत्तिसामर्थ्यात् = हानोपादानोपेक्षालक्षणायाः चेष्टायाः फलाभिसम्बन्धात् साफल्यात् वा, प्रमाणम् अर्थवत् = सफलं भवति, किं वा प्रमाणतो विशेषोपलब्ध्या प्रमाणत्वेन ज्ञातं भवति, प्रामाण्यग्रहो भवतीत्यर्थः । अथ वा अर्थो नाम विषयः, पदार्थः । अर्थवत्त्वं च अर्थसम्बन्धित्वम्, यथार्थज्ञानवत्त्वम् । याथार्थ्यं च तद्वस्तूनि तज्ज्ञानस्य अन्विति । यज्ज्ञानं नान्वेति न तत्प्रमाणाम्, न वा तत्प्रमाणस्य अर्थवत्त्वम्, न च तस्मिन् प्रामाण्यम् इति ।

अत्रेदं बोध्यम् - यदा प्रमाता प्रमाणेन पदार्थं ज्ञात्वा तदनुकूलव्यवहारे प्रवर्तते, अथ च तत्र साफल्यविशेषं च लभते, तदा ज्ञायते - प्रमाणे प्रामाण्यम् अस्ति, प्रमाणं सफलम् अस्तीति, परन्तु यदा प्रमाणेन पदार्थे ज्ञाते सति, प्रमाता फलाय न प्रवर्तते, प्रवृत्तौ सत्यां च विशेषाभीष्टं न प्राप्नोति, तदा प्रमाणस्य नार्थवत्त्वम् । अतः प्रमाणस्य साफल्यम् एव प्रमातुः सफलप्रवृत्तिरेवेति तात्पर्यम्, अथ वा प्रमातुः सफलप्रवृत्तिर्नाम प्रमाणस्य अर्थत्त्वम् एव । एतेन प्रमाणानां प्रामाण्यम् अप्रामाण्यं च परतः

सिद्धिर्भवतीति । एतावता इदं ज्ञातं भवति यत् - प्रमाणस्य विषयेन सह सम्बन्धानन्तरं यज्ज्ञानं जायते, तेन ज्ञानेन प्रमाता व्यवहारसिद्धौ प्रवर्तते, तत्र साफल्यं च लभते, तदा तस्य ज्ञानस्य याथार्थ्यं सिद्ध्यति, तदसाधारणकारणरूपे प्रमाणे च यथार्थज्ञानजनकत्वं लभ्यते, एवदेव च प्रमाणस्य अर्थवत्त्वमिति ।

प्रमाणस्य अर्थवत्त्वे लाभमाह भाष्यकारो वात्स्यायनः - अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति, कस्मात् ? अन्यतमापायेऽर्थस्यानुपपत्तेः (न्यायभाष्यम्, २०४३, पृ. ३) इति । प्रमाणस्य अर्थवत्त्वदशायाम् एव तिसृणां प्रमाता-प्रमेय-प्रमितीनां सार्थवत्त्वस्य सिद्धिर्भवति । एताषाम् अर्थवत्त्वं प्रमाणस्य अर्थवत्त्वाश्रितं भवति । प्रमाणे अर्थवति च सति प्रमाता प्रवृत्तिवद्भवति, तत्र साफल्यं च लभते, प्रमेयम् (पदार्थः) च ज्ञातं भवति, ज्ञानं (प्रमितिः) च यथार्थम् अयथार्थं वेति निश्चितं भवति । एतच्च सर्वं प्रमाणस्य अर्थवत्त्वसिद्धावेव सम्भवति । अत एवोक्तम् अर्थवति च प्रमाण इति । तदिदम् अर्थसम्बन्धिप्रमाणं पदार्थस्य तत्त्वज्ञापनाय प्रवर्तते । प्रमाणस्य अर्थवत्त्वं वा पदार्थस्य तत्त्वज्ञानाश्रितं भवति । किं तर्हि तत्त्वम् इत्यत्र न्यायभाष्यकारेण उच्यते - सतश्च सद्भावोऽसतश्चासद्भावः (वात्स्यायनः, न्यायभाष्यम्, २०४३, पृ. ३.) इति । सतो वस्तुनः सदद्भावः, असतो वस्तुनोऽसद्भाव एव तत्त्वमित्यर्थः । इत्थं ब्रूमः - अस्ति इति यद्वस्तु ज्ञायते, तस्य अस्तित्वेन ज्ञानम्, नास्ति इति यद्वस्तु ज्ञायते, तस्य नास्तित्वेन ज्ञानं तत्त्वमिति । इदं तु जानीम यत् - सत्तावन्तं वस्तु ज्ञापने प्रमाणं समर्थं भवति, परम् असत्-पदेन सम्बोधित-वस्तुज्ञापनं प्रमाणं कथं समर्थं भवेत् ? इत्यत्र आह भाष्यकारः - सत्युपलभ्यमाने तद्वदनुपलब्धेः प्रदीपवत् । यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति, यद्यभविष्यद् इदमिव व्यज्ञास्यत विज्ञानाभावाद् नास्तीति, तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति (वात्स्यायनः, न्यायभाष्यम्, २०४३, पृ. ४) इति । यथा प्रदीप उपलब्धं वस्तु 'अस्ति' इति प्रकाशयति, तद्वत् यद्वस्तु नास्ति, तत् 'नास्ति' इति च स एव दीपो बोधयति । एवं प्रमाणं च भाववस्तुनो भावत्वेन, अभाववस्तुनश्च अभावत्वेनैव ज्ञापयति ।

सर्वो लौकिकश्शास्त्रीयश्च व्यवहारः प्रमाणमाश्रित्यैव प्रवर्तते । न केवलं परीक्षकाः, अपि तु पामराश्च प्रयोजनं विचार्य निश्चयपूर्वकम् एव प्रवर्तन्ते व्यवहारेषु । उक्तं च कुत्रचित् - प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते । निश्चयश्च प्रमाणाधीनः । प्रयोजनं लक्ष्ययति भाष्यकारो यथा - येन प्रयुक्तः प्रवर्तते तत् प्रयोजनम् (वात्स्यायनः, न्यायभाष्यम्, २०४३, पृ. ६) इति । अर्थाद्येन सुखादिना प्रेरितः सन् सुखादिसाधनमाप्तुं जनः कर्मणि प्रवृत्तो भवति तत् प्रयोजनम् । न्यायसूत्रकारः प्रयोजनं सूत्रयति शब्दैरेतैः - यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् (न्यायसूत्रम् - १/१/२४) इति । यम् इष्टं सुखादिविषयम् उद्दिश्य लोकः प्रवृत्तो भवति, यस्माच्च अनिष्टाद् दुःखादिविषयात् निवर्तते, तत् प्रयोजनम् इत्यर्थः । अत्र सुखदुःखादिसाधारणम् अर्थपदेन गृह्यते । निष्प्रयोजने चाविदितविषये परीक्षकोऽपि न प्रवर्तेत । भट्टकुमारिलस्य वचनं स्मरन् भट्टो जयन्तः कथयति -

**सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।**
**यावत्प्रयोजनं नोक्तं तावत् तत्केन गृह्यते ॥** (न्यायमञ्जरी, प्रथमो भागः, २०७४, पृ. २५) इति ।

प्रमाणस्य प्रयोजनवत्त्वम्, अर्थवत्त्वं वेत्थम् उदाहरणेन जानीमः । यथा - तत्र प्रथमं चक्षुरिन्द्रियस्य घटेन सह सन्निकर्षो भवति, तदा चक्षुरिन्द्रयस्य मनसा सन्निकर्षः, मनसश्च आत्मना सन्निकर्षो भवति । तदनन्तरमेव 'अयं घटः', 'घटज्ञानवान् अहम्' वेति ज्ञानं जायते । घटज्ञानानन्तरं ज्ञातुर्जलाहरणादिकार्ये यदि प्रवृत्तिर्भवति, तदा तस्य प्रवृत्तौ साफल्यं दृष्ट्वा घटज्ञानस्य सत्यत्वं निश्चीयते । एवं सर्पज्ञानानन्तरं तदनिष्टं मत्वा ततो निवर्तते, अतश्च ज्ञानस्यास्य प्रमात्वं स्पष्टं भवति । धूमादिकं दृष्ट्वा अग्न्यादीन् अनुमिनोति । रामायणादिग्रन्थान् पठित्वा त्रेतायां राम आसीदिति निश्चिनोति । एवमेव शशशृङ्गादीनाम् अभावो भवतीति

शास्त्रवचनात् आप्तवाक्याच्च श्रुत्वा तस्याभावत्वं जानाति। इत्थमेव प्रमाणैः पदार्थविषयकं तत्त्वज्ञानं प्राप्य आत्यन्तिकरूपेण दुःखान्निवर्तते लोकः, इदमेव च मोक्षपदवाच्यं खल्विति।

**निष्कर्ष**

दर्शनशब्दो दृश्यते = ज्ञायतेऽनेन इति व्युत्पत्त्या ज्ञानसाधनपरत्वेन दर्शनक्षेत्रे प्रयुक्तो वर्तते। एतच्च दर्शनं पौरस्त्य-पाश्चात्यभेदेन द्विधा विभक्तम् अस्ति। पौरस्त्यदर्शनं च आस्तिकं नास्तिकं चेति द्विविधम् उच्यते। वेदं प्रमाणत्वेन अनुसृत्य प्रवर्तमानानि साङ्ख्यम्, योगः, न्यायः, वैशेषिकम्, मीमांसा, वेदान्तेति च षट् आस्तिकदर्शनानि सन्ति। वेदं प्रमाणत्वेन निषिध्य प्रवर्तमानानि चार्वाकदर्शनम्, जैनदर्शनम्, बौद्धदर्शनं चेति त्रीणि नास्तिकदर्शनानि सन्ति। दर्शनेषु वर्णितश्शास्त्रीयो व्यवहारो लौकिको व्यवहारश्च प्रमाणाधीनो वर्तते। प्रमीयते अनेन इदम् इतिव्युत्पत्त्या प्रमाणशब्दो वस्तुतत्त्वज्ञाने प्रकृष्टसाधनपरः। प्रमाणस्य तत्त्वज्ञानस्य साधनत्वात् सर्वैरपि दार्शनिकैः स्वसिद्धान्तपरिपोषकरूपेण विभिन्नानि प्रमाणानि अङ्गीकृतानि प्राप्यन्ते। भूतवादिनश्चार्वाकाः प्रत्यक्षम् एकम् एव प्रमाणं स्वीकुर्वन्ति, बौद्धा वैशेषिकाश्च प्रत्यक्षम्, अनुमानं चेति प्रमाणद्वयम्, साङ्ख्याः शब्दश्चेति त्रीणि प्रमाणानि, प्राभाकरमीमांसका सोपमानार्थापत्तिश्चेति पञ्च प्रमाणानि, भाट्टा अद्वैतवेदान्तिनश्च अनुपलब्धिश्चेति षट् प्रमाणानि, पौराणिकाः सम्भवम् ऐतिह्यं चेति अष्टौ प्रमाणानि अङ्गीकुर्वन्ति। नैयायिकास्तु प्रत्यक्षम, अनुमानम्, उपमानम्, शब्दश्चेति चत्वारि प्रमाणानि स्वीकुर्वन्ति। इतरदर्शनाङ्गीकृतानि प्रमाणानि एतेषु चतुर्षु एवान्तर्भाव्य व्यवहरन्ति। प्रमाणैरेतैः प्रमेयरूपो पदार्थो निश्चीयते। पदार्थस्य तत्त्वज्ञाने प्रमाणं साहाय्यं विदधाति। अर्थश्च न्यायमते पञ्चेन्द्रियाणां विषया गन्धरसरूपस्पर्शशब्दाः पृथिव्यादीनां पञ्चमहाभूतानां विशेषगुणाः। केशवमिश्रेण तु वैशेषिकाभीष्टा द्रव्यगुणादयः षट् पदार्था एव प्रमाणस्य अर्थत्वेन निर्दिष्टाः। अर्थवत्त्वं नाम प्रमाणस्य सप्रयोजनत्वं विषयवत्त्वं प्रमोत्पादकत्वं वेति। लौकिकाः परीक्षकाश्च प्रमाणपुरःसरं प्रयोजनपूर्वकं व्यवहारेषु प्रवर्तन्ते। प्रयोजनं विषयबोधः प्रमाजनक इत्यादिशब्दा अर्थस्य पर्यायत्वेन व्यवहृता दृश्यन्ते। प्रमाणं प्रमेयं प्रमाता प्रमितिश्चेति चतसृषु विधासु तत्त्वज्ञानं परिसमाप्यते। यदपि तत्त्वज्ञानं भवति, तस्य एताः चतस्र एव अवधि, एतदतिरिक्तं न किमपि अवशिष्यते। अर्थश्च दुःखं, दुःखहेतुः, सुखं सुखहेतुश्चेति न्यायमतानुसारेण कथ्यते।

सर्वेषाम् अनुकूलतया अनुभूयमानम् आत्मधर्मविशेषः सुखम्। तच्च धर्मजन्यं स्वर्गादिसुखसाधनम्। वेदादिशास्त्रैः कर्तव्यत्वेन विहितकर्मजन्यो धर्मः, विहितकर्माणि च गङ्गास्नान-याग-पितृसेवा-अतिथिसेवा- वापितडागादिनिर्माणादीनि। प्राणिनां प्रतिकूलतया अनुभूयमानं बाधनस्वरूपं दुःखम्। तच्च पीडा, तापादिशब्दैश्च सम्बोध्यते। एतद्दुःखं रजोगुणस्य परिणामः। न्यायमतानुसारेण दुःखम् एकविंशतिधा भिन्नम्। तत्र शरीरम्, मनसहितानि पञ्च ज्ञानेन्द्रियाणि, षड्विधं ज्ञानम्, षडर्थाः, सुखम्, दुःखं चेति। सकलप्राणिसमुदायस्य बाधनरूपस्य दुःखस्य कारणविषये दर्शेषु मतवैभिन्यं दृश्यते। योगमतानुसारेण अविद्यादयः पञ्चक्लेशाः दुःखस्य कारणम्, साङ्ख्यमते प्रकृतिपुरुषयोर्विवेकज्ञानराहित्यं दुःखस्य कारणम्। न्यायमते मिथ्याज्ञानं दुःखजनकम्। मिथ्याज्ञानात् इर्ष्यालोभादयो दोषाः, तैश्च हिंसा-स्तेय-अनृत-परुषवचन-परद्रोहादिषु प्रवृत्तिर्भवति, प्रवृत्तिश्चेयं जन्मनः कारणं भवति, तस्मात् महद्दुःखम् उत्पद्यते। अर्थश्चायं प्रत्यात्मना भिन्नभिन्नरूपेण प्रतिसंवेदनात् आनन्त्यं भजते, आत्मनां चानन्त्यात्। एतेषाम् अर्थानां निश्चयः प्रमाणेन भवति।

सर्वोऽपि लोकः प्रयोजनं निश्चित्य एव प्रवर्तते, निश्चये च प्रमाणम् एव साधनम्। अनुकूल इष्टत्वेन प्रवृत्तिः, प्रतिकुलाच्च अनिष्टत्वेन निवृत्तिर्जायते। इत्थं प्रमाणद्वारा प्रमोपलब्धौ हानोपादानात्मिका बुद्धिर्जायते। यदा प्रवृत्यनन्तरं फलावाप्तिर्भवति, तदा प्रमाणस्य अर्थवत्त्वं साधितं भवति। यथा - चक्षुरिन्द्रियेण घटज्ञानान्तरं जलाहरणाय प्रवृत्तो जनो जलाशयं

प्राप्य जलम् आहरति, तदा घटज्ञानस्य प्रमात्वं सिद्ध्यति। एतदेव प्रमाणस्य अर्थवत्वम्। घटज्ञानानन्तरंम् अपि जलाशयं प्राप्तो जन यदि तत्र जलाहरणेऽसमर्थो भवति, तदा तस्य प्रमात्वं न सिद्ध्यति, तच्च प्रमाणं नार्थवद्भवति। एवम् इष्टेषु प्रवृत्तिसामर्थ्यात्, अनिष्टाच्च निवृत्तिसार्थ्यात्, हानोपादानोपेक्षायाः साफल्याच्च प्रमाणस्य अर्थवत्त्वं सिद्धं भवति। इत्थं प्रमाणस्य प्रामाण्यादिविषया अनुसन्धेया वर्तन्त इति।

**कार्तज्ञविनिवेदनम्**

येषां महर्षिणां पूर्वजानां न्यायसूत्रप्रणेतृणाम् अन्येषां च ग्रन्थेभ्यो यथानुकूलं यथावश्यकं च सामग्रीसङ्कलनं कृतं प्रयोगश्चात्र विहितोऽनुसन्धानात्मके लघ्वालेखे, यैश्च गुरुजनैर्लेखस्यास्य विषयादिकं समीक्ष्य परामर्शं प्रदत्तम्, तान् परमोपकर्तॄन् सर्वानपि हार्दैः सुवचोभिः कार्तज्ञविनिवेदनेन सभाजयामि।

## सन्दर्भ-कृतिसूची

अन्नम्भट्टः. (ई.सं २००३). *तर्कसङ्ग्रहः.* (न्यायबोधिनी-पदकृत्य-दीपिका-किरणावली-व्याख्योपेतः). चौखम्बा विद्या भवन।

ईश्वरकृष्णः. (ई.सं. २०२३). *साङ्ख्यकारिका.* (गौडपादभाष्यान्विता). चौखम्बा सुरभारती प्रकाशन।

उद्योतकरः, भारद्वाजः. (२०६४). *न्यायवार्तिकम्.* पु.मु.सं.. चौखम्बा संस्कृत भवन।

गौतमः. (२०६९). *न्यायदर्शनम्.* (वात्स्यायनभाष्यसहितम्, हिन्दीव्या. आचार्य ढुण्डिराजशास्त्री). चौखम्बा विद्या भवन।

भट्टः, जयन्तः. (२०७४). *न्यायमञ्जरी.* (ग्रन्थिभङ्गव्याख्यायुता). प्रथमो भागः. सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

भट्टः, नारायणः. पण्डितः, नारायणः. (ई.सं. २०१७). *मानमेयोदयः.* (स्वामियोगीन्द्रानन्दकृत-हिन्दीव्याख्यायुतः). चौखम्बा विद्या भवन।

भट्टाचार्यः, विश्वनाथपञ्चाननः. (२०५३). *न्यायसिद्धान्तमुक्तावली.* (श्रीकृष्णवल्लभाचार्यकृत-किरणावलीयुता). पु.मु.सं.. चौखम्बा संस्कृत संथान।

भीमाचार्यः. (ई.सं. २००१). *न्यायकोशः.* चौखम्बा सुरभारती प्रकाशन।

मिश्रः, केशवः. (ई.सं. २०१७). *तर्कभाषा.* (गजाननशास्त्री-मुसलगाँवकरकृत-हिन्दीव्याख्यासहिता). चौखम्बा सुरभारती प्रकाशन।

मिश्रः, वाचस्पतिः. (ई.सं. २०१२). *साङ्ख्यतत्त्वकौमुदी.* (ज्वालाप्रसादगौडकृतहिन्दीव्याख्यासहिता). चौखम्बा सुरभारती प्रकाशन।

वात्स्यायनः. (२०४३). *न्यायभाष्यम्.* (सुदर्शनाचार्यविरचित-प्रसन्नपदाख्यव्याख्यायुतम्). सुधीप्रकाशनम्।

वेदव्यासः. (२०६०). *श्रीमद्भगवद्गीता.* अ.सं.. (श्रीरामानुजभाष्य-हिन्दीअनुवादसहिता). गीताप्रेस।